# જ્ઞાનસાર

## પૂર્ણતાષ્ટકમ્-૧

ઐન્દ્રશ્રીસુખમગ્નેન, લીલાલગ્નમિવાખિલમ્ ।
સચ્ચિદાનન્દપૂર્ણેન, પૂર્ણં જગદવેક્ષ્યતે ॥૧॥
પૂર્ણતા યા પરોપાધેઃ, સા યાચિતક-મણ્ડનમ્ ।
યા તુ સ્વાભાવિકી સૈવ, જાત્યરત્નવિભાનિભા ॥૨॥
અવાસ્તવી વિકલ્પૈઃ સ્યાત્, પૂર્ણતાબ્ધેરિવોર્મિભિઃ ।
પૂર્ણાનન્દસ્તુ ભગવાન્, સ્તિમિતોદધિસન્નિભઃ ॥૩॥
જાગર્તિ જ્ઞાનદૃષ્ટિશ્ચેત્, તૃષ્ણાકૃષ્ણાહિજાઙ્ગુલી ।
પૂર્ણાનન્દસ્ય તત્ કિં સ્યાદ્, દૈન્ય-વૃશ્ચિક-વેદના? ॥૪॥
પૂર્યન્તે યેન કૃપણા, -સ્તદુપેક્ષૈવ પૂર્ણતા ।
પૂર્ણાનન્દસુધાસ્નિગ્ધા, દૃષ્ટિરેષા મનીષિણામ્ ॥૫॥
અપૂર્ણઃ પૂર્ણતામેતિ, પૂર્યમાણસ્તુ હીયતે ।
પૂર્ણાનન્દસ્વભાવોઽયં, જગદદ્ભુતદાયકઃ ॥૬॥
પરસ્વત્વકૃતોન્માથા, ભૂનાથા ન્યૂનતેક્ષિણઃ ।
સ્વસ્વત્વસુખપૂર્ણસ્ય, ન્યૂનતા ન હરેરપિ ॥૭॥
કૃષ્ણે પક્ષે પરિક્ષીણે, શુક્લે ચ સમુદઞ્ચતિ ।
દ્યોતન્તે સકલાધ્યક્ષાઃ, પૂર્ણાનન્દવિધોઃ કલાઃ ॥૮॥

## મગ્નતાષ્ટકમ્-૨

પ્રત્યાહૃત્યેન્દ્રિયવ્યૂહં, સમાધાય મનો નિજમ્ ।
દધચ્ચિન્માત્રવિશ્રાન્તિં, મગ્ન ઇત્યભિધીયતે ॥૧॥
યસ્ય જ્ઞાનસુધાસિન્ધૌ, પરબ્રહ્મણિ મગ્નતા ।
વિષયાન્તરસંચાર, -સ્તસ્ય હાલાહલોપમઃ ॥૨॥
સ્વભાવસુખમગ્નસ્ય, જગત્તત્ત્વાવલોકિનઃ ।
કર્તૃત્વં નાન્યભાવાનાં, સાક્ષિત્વ-મવશિષ્યતે ॥૩॥
પરબ્રહ્મણિ મગ્નસ્ય, શ્લથા પૌદ્ગલિકી કથા ।
ક્વામી ચામીકરોન્માદા; સ્ફારા દારાદરાઃ ક્વ ચ ॥૪॥
તેજોલેશ્યાવિવૃદ્ધિર્યા, સાધોઃ પર્યાયવૃદ્ધિતઃ ।
ભાષિતા ભગવત્યાદૌ, સેત્થમ્ભૂતસ્ય યુજ્યતે ॥૫॥
જ્ઞાનમગ્નસ્ય યચ્છર્મ, તદ્ વક્તું નૈવ શક્યતે ।
નોપમેયં પ્રિયાશ્લેષૈ, -ર્નાપિ તચ્ચન્દનદ્રવૈઃ ॥૬॥
શમશૈત્યપુષો યસ્ય, વિપ્રુષોઽપિ મહાકથા ।
કિં સ્તુમો જ્ઞાનપીયૂષે, તત્ર સર્વાઙ્ગમગ્નતામ્? ॥૭॥
યસ્ય દૃષ્ટિઃ કૃપાવૃષ્ટિ, -ર્ગિરઃ શમસુધાકિરઃ ।
તસ્મૈ નમઃ શુભજ્ઞાન, -ધ્યાનમગ્નાય યોગિને ॥૮॥

## સ્થિરતાષ્ટકમ્-૩

વત્સ! કિં ચઞ્ચલસ્વાન્તો, ભ્રાન્ત્વા ભ્રાન્ત્વા વિષીદસિ ।
નિધિં સ્વસન્નિધાવેવ, સ્થિરતા દર્શયિષ્યતિ ॥૧॥
જ્ઞાનદુગ્ધં વિનશ્યેત, લોભવિક્ષોભકૂર્ચકૈઃ ।
અમ્લદ્રવ્યાદિવાસ્થૈર્યા,-દિતિ મત્વા સ્થિરો ભવ ॥૨॥
અસ્થિરે હૃદયે ચિત્રા, વાઙ્નેત્રાકારગોપના ।
પુંશ્ચલ્યા ઇવ કલ્યાણ,-કારિણી ન પ્રકીર્તિતા ॥૩॥
અન્તર્ગતં મહાશલ્ય,-મસ્થૈર્યં યદિ નોદ્ધૃતમ્ ।

jainuniversity.org
सर्व ज्ञानाय भवतु

ક્રિયૌષધસ્ય કો દોષ, -સ્તદા ગુણમયચ્છતઃ ॥૪॥
સ્થિરતા વાઙ્મનઃકાયૈ,-ર્યેષામઙ્ગાઙ્ગિતાં ગતા ।
યોગિનઃ સમશીલાસ્તે, ગ્રામેડરણ્યે દિવા નિશિ ॥૫॥
સ્થૈર્યરત્નપ્રદીપશ્ચેદ્, -દીપ્રઃ સઙ્કલ્પદીપજૈઃ ।
તદ્વિકલ્પૈરલં ધૂમૈ,-રલંધૂમૈસ્તથાશ્રવૈઃ ॥૬॥
ઉદીરયિષ્યસિ સ્વાન્તા,-દસ્થૈર્યં પવનં યદિ ।
સમાધેર્ધર્મમેઘસ્ય, ઘટાં વિઘટયિષ્યસિ ॥૭॥
ચારિત્રં સ્થિરતારૂપ,-મતઃ સિદ્ધેષ્વપીષ્યતે ।
યતન્તાં યતયોડવશ્ય,-મસ્યા એવ પ્રસિદ્ધયે ॥૮॥

## મોહત્યાગાષ્ટકમ્-૪

અહં મમેતિ મન્ત્રોડયં, મોહસ્ય જગદાન્ધ્યકૃત્ ।
અયમેવ હિ નઞ્પૂર્વઃ, પ્રતિમન્ત્રોડપિ મોહજિત્ ॥૧॥
શુદ્ધાત્મદ્રવ્યમેવાહં, શુદ્ધજ્ઞાનં ગુણો મમ ।
નાન્યોડહં ન મમાન્યે ચે-,ત્યદો મોહાસ્ત્રમુલ્બણમ્ ॥૨॥
યો ન મુહ્યતિ લગ્નેષુ, ભાવેષ્વૌદયિકાદિષુ ।
આકાશમિવ પઙ્કેન, નાસૌ પાપેન લિપ્યતે ॥૩॥
પશ્યન્નેવ પરદ્રવ્ય-, નાટકં પ્રતિપાટકમ્ ।
ભવચક્રપુરસ્થોડપિ, નામૂઢઃ પરિખિદ્યતે ॥૪॥
વિકલ્પચષકૈરાત્મા, પીતમોહાસવો હ્યયમ્ ।
ભવોચ્ચતાલ-મુત્તાલ-, પ્રપઞ્ચ-મધિતિષ્ઠતિ ॥૫॥
નિર્મલં સ્ફટિકસ્યેવ, સહજં રૂપમાત્મનઃ ।
અધ્યસ્તોપાધિસંબન્ધો, જડસ્તત્ર વિમુહ્યતિ ॥૬॥
અનારોપસુખં મોહ,- ત્યાગાદનુભવન્નપિ ।
આરોપપ્રિયલોકેષુ, વક્તુમાશ્ચર્યવાન્ ભવેત્ ॥૭॥
યશ્ચિદ્દર્પણવિન્યસ્ત,- સમસ્તાચારચારુધીઃ ।
ક્વ નામ સ પરદ્રવ્યે,-ડનુપયોગિનિ મુહ્યતિ ॥૮॥

## જ્ઞાનાષ્ટકમ્-૫

મજ્જત્યજ્ઞઃ કિલાજ્ઞાને, વિષ્ટાયામિવ શૂકરઃ ।
જ્ઞાની નિમજ્જતિ જ્ઞાને, મરાલ ઇવ માનસે ॥૧॥
નિર્વાણપદમપ્યેકં, ભાવ્યતે યન્મુહુર્મુહુઃ ।
તદેવ જ્ઞાનમુત્કૃષ્ટં, નિર્બન્ધો નાસ્તિ ભૂયસા ॥૨॥
સ્વભાવલાભસંસ્કાર,-કારણં જ્ઞાનમિષ્યતે ।
ધ્યાન્ધ્યમાત્રમતસ્ત્વન્યત્, તથા ચોક્તં મહાત્મના ॥૩॥
વાદાંશ્ચ પ્રતિવાદાંશ્ચ, વદન્તોડનિશ્ચિતાંસ્તથા ।
તત્ત્વાન્તં નૈવ ગચ્છન્તિ, તિલપીલકવદ્ ગતૌ ॥૪॥
સ્વદ્રવ્યગુણપર્યાય,-ચર્યા વર્યા પરાન્યથા ।
ઇતિ દત્તાત્મસંતુષ્ટિ,-ર્મુષ્ટિજ્ઞાનસ્થિતિર્મુનેઃ ॥૫॥
અસ્તિ ચેદ્ ગ્રન્થિભિજ્જ્ઞાનં, કિં ચિત્રૈસ્તન્ત્રયન્ત્રણૈઃ? ।
પ્રદીપાઃ ક્વોપયુજ્યન્તે, તમોઘ્ની દૃષ્ટિરેવ ચેત્? ॥૬॥
મિથ્યાત્વશૈલપક્ષચ્છિજ્, જ્ઞાનદમ્ભોલિશોભિતઃ ।
નિર્ભયઃ શક્રવદ્યોગી, નન્દત્યાનન્દનન્દને ॥૭॥
પીયૂષમસમુદ્રોત્થં, રસાયનમનૌષધમ્ ।
અનન્યાપેક્ષમૈશ્વર્યં, જ્ઞાનમાહુર્મનીષિણઃ ॥૮॥

jainuniversity.org
સર્વ જ્ઞાનાય ભવતુ

## શમાષ્ટકમ્-૬

વિકલ્પવિષયોત્તીર્ણઃ, સ્વભાવાલમ્બનઃ સદા ।
જ્ઞાનસ્ય પરિપાકો યઃ, સ શમઃ પરિકીર્તિતઃ ॥૧॥
અનિચ્છન્ કર્મવૈષમ્યં, બ્રહ્માંશેન સમં જગત્ ।
આત્માભેદેન યઃ પશ્યે,-દસૌ મોક્ષં ગમી શમી ॥૨॥
આરુરુક્ષુર્મુનિર્યોગં, શ્રયેદ્ બાહ્યક્રિયામપિ ।
યોગારૂઢઃ શમાદેવ, શુદ્ધ્યત્યન્તર્ગતક્રિયઃ ॥૩॥
ધ્યાનવૃષ્ટેર્દયાનદ્યાઃ, શમપૂરે પ્રસર્પતિ ।
વિકારતીરવૃક્ષાણાં, મૂલાદુન્મૂલનં ભવેત્ ॥૪॥
જ્ઞાનધ્યાનતપઃશીલ,-સમ્યક્ત્વસહિતોઽપ્યહો! ।
તં નાપ્નોતિ ગુણં સાધુ,-ર્યં પ્રાપ્નોતિ શમાન્વિતઃ ॥૫॥
સ્વયમ્ભૂરમણસ્પર્દ્ધિ,-વર્ધિષ્ણુસમતારસઃ ।
મુનિર્યેનોપમીયેત, કોઽપિ નાસૌ ચરાચરે ॥૬॥
શમસૂક્તસુધાસિક્તં, યેષાં નક્તંદિનં મનઃ ।
કદાપિ તે ન દહ્યન્તે, રાગોરગવિષોર્મિભિઃ ॥૭॥
ગર્જજ્જ્ઞાનગજોત્તુઙ્ગ,-રઙ્ગદ્ધ્યાનતુરઙ્ગમાઃ ।
જયન્તિ મુનિરાજસ્ય, શમસામ્રાજ્યસંપદઃ ॥૮॥

## ઇન્દ્રિયજયાષ્ટકમ્-૭

બિભ્મેષિ યદિ સંસારાન્,-મોક્ષપ્રાપ્તિં ચ કાઙ્ક્ષસિ ।
તદેન્દ્રિયજયં કર્તું, સ્ફોરય સ્ફાર-પૌરુષમ્ ॥૧॥
વૃદ્ધાસ્તૃષ્ણાજલાપૂર્ણૈ,-રાલવાલૈઃ કિલેન્દ્રિયૈઃ ।
મૂર્છામતુચ્છાં યચ્છન્તિ, વિકારવિષપાદપાઃ ॥૨॥
સરિત્સહસ્રદુષ્પૂર,-સમુદ્રોદરસોદરઃ ।
તૃપ્તિમાન્નેન્દ્રિયગ્રામો, ભવ તૃપ્તોઽન્તરાત્મના ॥૩॥
આત્માનં વિષયૈઃ પાશૈ,-ર્ભવવાસ-પરાઙ્મુખમ્ ।
ઇન્દ્રિયાણિ નિબધ્નન્તિ, મોહરાજસ્ય કિઙ્કરાઃ ॥૪॥
ગિરિમૃત્સ્નાં ધનં પશ્યન્, ધાવતી ન્દ્રિયમોહિતઃ ।
અનાદિનિધનં જ્ઞાનં, ધનં પાર્શ્વે ન પશ્યતિ ॥૫॥
પુરઃ પુરઃ સ્ફુરત્તૃષ્ણા,-મૃગતૃષ્ણાનુકારિષુ ।
ઇન્દ્રિયાર્થેષુ ધાવન્તિ, ત્યક્ત્વા જ્ઞાનામૃતં જડાઃ ॥૬॥
પતઙ્ગભૃઙ્ગમીનેભ,-સારઙ્ગા યાન્તિ દુર્દશામ્ ।
એકૈકેન્દ્રિયદોષાચ્ચેદ્, દુષ્ટૈસ્તૈઃ કિં ન પઞ્ચભિઃ ॥૭॥
વિવેકદ્વિપહર્યક્ષૈઃ, સમાધિધનતસ્કરૈઃ ।
ઇન્દ્રિયૈર્ન જિતો યોઽસૌ, ધીરાણાં ધુરિ ગણ્યતે ॥૮॥

## ત્યાગાષ્ટકમ્-૮

સંયતાત્મા શ્રયે શુદ્ધો,-પયોગં પિતરં નિજમ્ ।
ધૃતિમમ્બાં ચ પિતરૌ, તન્માં વિસૃજતં ધ્રુવમ્ ॥૧॥
યુષ્માકં સઙ્ગમોઽનાદિ,-ર્બન્ધવોઽનિયતાત્મનામ્ ।
ધ્રુવૈકરૂપાન્ શીલાદિ,- બન્ધૂનિત્યધુના શ્રયે ॥૨॥
કાન્તા મે સમતૈવૈકા, જ્ઞાતયો મે સમક્રિયાઃ ।
બાહ્યવર્ગમિતિ ત્યક્ત્વા, ધર્મસંન્યાસવાન્ ભવેત્ ॥૩॥
ધર્માસ્ત્યાજ્યાઃ સુસઙ્ગોત્થાઃ, ક્ષાયોપશમિકા અપિ ।
પ્રાપ્ય ચન્દનગન્ધાભં, ધર્મસંન્યાસમુત્તમમ્ ॥૪॥

jainuniversity.org
સર્વ જ્ઞાનાય ભવતુ

ગુરુત્વં સ્વસ્ય નોદેતિ, શિક્ષાસાત્મ્યેન યાવતા ।
આત્મતત્ત્વપ્રકાશેન, તાવત્ સેવ્યો ગુરૂત્તમઃ ॥૫॥
જ્ઞાનાચારાદયોઽપીષ્ટાઃ, શુદ્ધસ્વસ્વપદાવધિ ।
નિર્વિકલ્પે પુનસ્ત્યાગે, ન વિકલ્પો ન વા ક્રિયા ॥૬॥
યોગસંન્યાસતસ્ત્યાગી, યોગાનપ્યખિલાંસ્ત્યજેત્ ।
ઇત્યેવં નિર્ગુણં બ્રહ્મ, પરોક્તમુપપદ્યતે ॥૭॥
વસ્તુતસ્તુ ગુણૈઃ પૂર્ણ,-મનન્તૈર્ભાસતે સ્વતઃ ।
રૂપં ત્યક્તાત્મનઃ સાધો,-ર્નિરભ્રસ્ય વિધોરિવ ॥૮॥

## ક્રિયાષ્ટકમ્-૯

જ્ઞાની ક્રિયાપરઃ શાન્તો, ભાવિતાત્મા જિતેન્દ્રિયઃ ।
સ્વયં તીર્ણો ભવામ્ભોધેઃ, પરાંસ્તારયિતું ક્ષમઃ ॥૧॥
ક્રિયાવિરહિતં હન્ત, જ્ઞાનમાત્રમનર્થકમ્ ।
ગતિં વિના પથજ્ઞોઽપિ, નાપ્નોતિ પુરમીપ્સિતમ્ ॥૨॥
સ્વાનુકૂલાં ક્રિયાં કાલે, જ્ઞાનપૂર્ણોઽપ્યપેક્ષતે ।
પ્રદીપઃ સ્વપ્રકાશોઽપિ, તૈલપૂર્ત્યાદિકં યથા ॥૩॥
બાહ્યભાવં પુરસ્કૃત્ય, યે ક્રિયાંઽવ્યવહારતઃ ।
વદને કવલક્ષેપં, વિના તે તૃપ્તિકાઙ્ક્ષિણઃ ॥૪॥
ગુણવદ્બહુમાનાદે,-ર્નિત્યસ્મૃત્યા ચ સત્ક્રિયા ।
જાતં ન પાતયેદ્ ભાવ,-મજાતં જનયેદપિ ॥૫॥
ક્ષાયોપશમિકે ભાવે, યા ક્રિયા ક્રિયતે તયા ।
પતિતસ્યાપિ તદ્ભાવ,-પ્રવૃદ્ધિર્જાયતે પુનઃ ॥૬॥
ગુણવદ્ધ્યૈ તતઃ કુર્યાત્, ક્રિયામસ્ખલનાય વા ।
એકં તુ સંયમસ્થાનં, જિનાનામવતિષ્ઠતે ॥૭॥
વચોઽનુષ્ઠાનતોઽસઙ્ગ,-ક્રિયાસઙ્ગતિમઙ્ગતિ ।
સેયં જ્ઞાનક્રિયાઽભેદ-, ભૂમિરાનન્દપિચ્છલા ॥૮॥

## તૃપ્ત્યષ્ટકમ્-૧૦

પીત્વા જ્ઞાનામૃતં ભુક્ત્વા, ક્રિયાસુરલતાફલમ્ ।
સામ્યતામ્બૂલમાસ્વાદ્ય, તૃપ્તિં યાતિ પરાં મુનિઃ ॥૧॥
સ્વગુણૈરેવ તૃપ્તિશ્ચે-, દાકાલમવિનશ્વરી ।
જ્ઞાનિનો વિષયૈઃ કિં તૈ,- ર્યૈર્ભવેત્ તૃપ્તિરિત્વરી ॥૨॥
યા શાન્તૈકરસાસ્વાદાદ્, ભવેત્ તૃપ્તિરતીન્દ્રિયા ।
સા ન જિહ્વેન્દ્રિયદ્વારા, ષડ્રસાસ્વાદનાદપિ ॥૩॥
સંસારે સ્વપ્નવન્ મિથ્યા, તૃપ્તિઃ સ્યાદાભિમાનિકી ।
તથ્યા તુ ભ્રાન્તિશૂન્યસ્ય, સાત્મવીર્યવિપાકકૃત્ ॥૪॥
પુદ્ગલૈઃ પુદ્ગલાસ્તૃપ્તિં, યાન્ત્યાત્મા પુનરાત્મના ।
પરતૃપ્તિસમારોપો, જ્ઞાનિનસ્તન્ન યુજ્યતે ॥૫॥
મધુરાજ્યમહાશાકા,-ગ્રાહ્યે બાહ્યે ચ ગોરસાત્ ।
પરબ્રહ્મણિ તૃપ્તિર્યા, જનાસ્તાં જાનતેઽપિ ન ॥૬॥
વિષયોર્મિવિષોદ્ગારઃ, સ્યાદતૃપ્તસ્ય પુદ્ગલૈઃ ।
જ્ઞાનતૃપ્તસ્ય તુ ધ્યાન-,સુધોદ્ગારપરંપરા ॥૭॥
સુખિનો વિષયાતૃપ્તા, નેન્દ્રોપેન્દ્રાદયોઽપ્યહો ।
ભિક્ષુરેકઃ સુખી લોકે, જ્ઞાનતૃપ્તો નિરઞ્જનઃ ॥૮॥

## નિર્લેપાષ્ટકમ્-૧૧

jainuniversity.org
સર્વ જ્ઞાનાય ભવતુ

સંસારે નિવસન્ સ્વાર્થ,- સજ્જઃ કજ્જલવેશ્મનિ ।
લિપ્યતે નિખિલો લોકો, જ્ઞાનસિદ્ધો ન લિપ્યતે ॥૧॥
નાહં પુદ્ગલભાવાનાં, કર્તા કારયિતાઽપિ ન ।
નાનુમન્તાપિ ચેત્યાત્મ,-જ્ઞાનવાન્ લિપ્યતે કથમ્ ॥૨॥
લિપ્યતે પુદ્ગલસ્કન્ધો, ન લિપ્યે પુદ્ગલૈરહમ્ ।
ચિત્રવ્યોમાઞ્જનેનેવ, ધ્યાયન્નિતિ ન લિપ્યતે ॥૩॥
લિપ્તતાજ્ઞાનસમ્પાત,-પ્રતિઘાતાય કેવલમ્ ।
નિર્લેપજ્ઞાનમગ્નસ્ય, ક્રિયા સર્વોપયુજ્યતે ॥૪॥
તપઃશ્રુતાદિના મત્તઃ, ક્રિયાવાનપિ લિપ્યતે ।
ભાવનાજ્ઞાનસમ્પન્નો, નિષ્ક્રિયોઽપિ ન લિપ્યતે ॥૫॥
અલિપ્તો નિશ્ચયેનાત્મા, લિપ્તશ્ચ વ્યવહારતઃ ।
શુદ્ધ્યત્યલિપ્તયા જ્ઞાની, ક્રિયાવાન્ લિપ્તયા દૃશા ॥૬॥
જ્ઞાનક્રિયાસમાવેશઃ, સહૈવોન્મીલને દ્વયોઃ ।
ભૂમિકાભેદતસ્ત્વત્ર, ભવેદેકૈકમુખ્યતા ॥૭॥
સજ્ઞાનં યદનુષ્ઠાનં, ન લિપ્તં દોષપઙ્કતઃ ।
શુદ્ધબુદ્ધસ્વભાવાય, તસ્મૈ ભગવતે નમઃ ॥૮॥

**નિઃસ્પૃહાષ્ટકમ્-૧૨**

સ્વભાવલાભાત્ કિમપિ, પ્રાપ્તવ્યં નાવશિષ્યતે ।
ઇત્યાત્મૈશ્વર્યસમ્પન્નો, નિઃસ્પૃહો જાયતે મુનિઃ ॥૧॥
સંયોજિતકરૈઃ કે કે, પ્રાર્થ્યન્તે ન સ્પૃહાવહૈઃ? ।
અમાત્રજ્ઞાનપાત્રસ્ય, નિઃસ્પૃહસ્ય તૃણં જગત્ ॥૨॥
છિન્દન્તિ જ્ઞાનદાત્રેણ, સ્પૃહાવિષલતાં બુધાઃ ।
મુખશોષં ચ મૂર્ચ્છાં ચ, દૈન્યં યચ્છતિ યત્ફલમ્ ॥૩॥
નિષ્કાસનીયા વિદુષા, સ્પૃહા ચિત્તગૃહાદ્ બહિઃ ।
અનાત્મરતિચાણ્ડાલી-, સઙ્ગમઙ્ગીકરોતિ યા ॥૪॥
સ્પૃહાવન્તો વિલોક્યન્તે, લઘવસ્તૃણતૂલવત્ ।
મહાશ્ચર્યં તથાપ્યેતે, મજ્જન્તિ ભવવારિધૌ ॥૫॥
ગૌરવં પૌરવન્દ્યત્વાત્, પ્રકૃષ્ટત્વં પ્રતિષ્ઠયા ।
ખ્યાતિં જાતિગુણાત્સ્વસ્ય, પ્રાદુષ્કુર્યાન્ન નિઃસ્પૃહઃ ॥૬॥
ભૂશય્યા ભૈક્ષમશનં, જીર્ણં વાસો વનં ગૃહમ્ ।
તથાપિ નિઃસ્પૃહસ્યાહો, ચક્રિણોઽપ્યધિકં સુખમ્ ॥૭॥
પરસ્પૃહા મહાદુઃખં, નિઃસ્પૃહત્વં મહાસુખમ્ ।
એતદુક્તં સમાસેન, લક્ષણં સુખદુઃખયોઃ ॥૮॥

**મૌનાષ્ટકમ્-૧૩**

મન્યતે યો જગત્તત્ત્વં, સ મુનિઃ પરિકીર્ત્તિતઃ ।
સમ્યક્ત્વમેવ તન્મૌનં, મૌનં સમ્યક્ત્વમેવ વા ॥૧॥
આત્માત્મન્યેવ યચ્છુદ્ધં, જાનાત્યાત્માનમાત્મના ।
સેયં રત્નત્રયે જ્ઞપ્તિ,-રુચ્યાચારૈકતા મુનેઃ ॥૨॥
ચારિત્રમાત્મચરણાજ્, જ્ઞાનં વા દર્શનં મુનેઃ ।
શુદ્ધજ્ઞાનનયે સાધ્યં, ક્રિયાલાભાત્ક્રિયાનયે ॥૩॥
યતઃ પ્રવૃત્તિર્ન મણૌ, લભ્યતે વા ન તત્ફલમ્ ।
અતાત્ત્વિકી મણિજ્ઞપ્તિ-ર્મણિશ્રદ્ધા ચ સા યથા ॥૪॥
તથા યતો ન શુદ્ધાત્મ,-સ્વભાવાચરણં ભવેત્ ।

jainuniversity.org
સર્વ જ્ઞાનાય ભવતુ

ફલં દોષનિવૃત્તિર્વા, ન તજ્જ્ઞાનં ન દર્શનમ્ ॥૫॥
યથા શોફસ્ય પુષ્ટત્વં, યથા વા વધ્યમણ્ડનમ્ ।
તથા જાનન્ ભવોન્માદ,-માત્મતૃપ્તો મુનિર્ભવેત્ ॥૬॥
સુલભં વાગનુચ્ચારં, મૌનમેકેન્દ્રિયેષ્વપિ ।
પુદ્ગલેષ્વપ્રવૃત્તિસ્તુ, યોગાનાં મૌનમુત્તમમ્ ॥૭॥
જ્યોતિર્મયીવ દીપસ્ય, ક્રિયા સર્વાપિ ચિન્મયી ।
યસ્યાનન્યસ્વભાવસ્ય, તસ્ય મૌનમનુત્તરમ્ ॥૮॥

**વિદ્યાષ્ટકમ્-૧૪**

નિત્યશુચ્યાત્મતાખ્યાતિ,-રનિત્યાશુચ્યનાત્મસુ ।
અવિદ્યા તત્ત્વધીર્વિદ્યા, યોગાચાર્યૈઃ પ્રકીર્તિતા ॥૧॥
યઃ પશ્યેન્નિત્યમાત્માન,- મનિત્યં પરસઙ્ગમમ્ ।
છલં લબ્ધું ન શક્નોતિ, તસ્ય મોહમલિમ્લુચઃ ॥૨॥
તરઙ્ગતરલાં લક્ષ્મી-, માયુર્વાયુવદસ્થિરમ્ ।
અદભ્રધીરનુધ્યાયે,-દભ્રવદ્ ભઙ્ગુરં વપુઃ ॥૩॥
શુચીન્યપ્યશુચીકર્તું, સમર્થેઽશુચિસંભવે ।
દેહે જલાદિના શૌચ,- ભ્રમો મૂઢસ્ય દારુણઃ ॥૪॥
યઃ સ્નાત્વા સમતાકુણ્ડે, હિત્વા કશ્મલજં મલમ્ ।
પુનર્ન યાતિ માલિન્યં, સોઽન્તરાત્મા પરઃ શુચિઃ ॥૫॥
આત્મબોધો નવઃ પાશો, દેહગેહધનાદિષુ ।
યઃ ક્ષિપ્તોઽપ્યાત્મના તેષુ, સ્વસ્ય બન્ધાય જાયતે ॥૬॥
મિથોયુક્તપદાર્થાના,-મસંક્રમચમત્ક્રિયા ।
ચિન્માત્રપરિણામેન, વિદુષૈવાનુભૂયતે ॥૭॥
અવિદ્યાતિમિરધ્વંસે, દૃશા વિદ્યાઞ્જનસ્પૃશા ।
પશ્યન્તિ પરમાત્માન,-માત્મન્યેવ હિ યોગિનઃ ॥૮॥

**વિવેકાષ્ટકમ્-૧૫**

કર્મ જીવં ચ સંશ્લિષ્ટં, સર્વદા ક્ષીરનીરવત્ ।
વિભિન્નીકુરુતે યોઽસૌ, મુનિહંસો વિવેકવાન્ ॥૧॥
દેહાત્માદ્યવિવેકોઽયં, સર્વદા સુલભો ભવે ।
ભવકોટ્યાપિ તદ્ભેદ,-વિવેકસ્ત્વતિદુર્લભઃ ॥૨॥
શુદ્ધેઽપિ વ્યોમ્નિ તિમિરાદ્, રેખાભિર્મિશ્રતા યથા ।
વિકારૈર્મિશ્રતા ભાતિ, તથાત્મન્યવિવેકતઃ ॥૩॥
યથા યોધૈઃ કૃતં યુદ્ધં, સ્વામિન્યેવોપચર્યતે ।
શુદ્ધાત્મન્યવિવેકેન, કર્મસ્કન્ધોર્જિતં તથા ॥૪॥
ઇષ્ટકાદ્યપિ હિ સ્વર્ણં, પીતોન્મત્તો યથેક્ષતે ।
આત્માભેદભ્રમસ્તદ્વદ્, દેહાદાવવિવેકિનઃ ॥૫॥
ઇચ્છન્ ન પરમાન્ ભાવાન્, વિવેકાદ્રેઃ પતત્યધઃ ।
પરમં ભાવમન્વિચ્છન્, નાવિવેકે નિમજ્જતિ ॥૬॥
આત્મન્યેવાત્મનઃ કુર્યાદ્, યઃ ષટ્કારકસંગતિમ્ ।
ક્વાવિવેકજ્વરસ્યાસ્ય, વૈષમ્યં જડમજ્જનાત્? ॥૭॥
સંયમાસ્ત્રં વિવેકેન, શાણેનોત્તેજિતં મુનેઃ ।
ધૃતિધારોલ્બણં કર્મ,-શત્રુચ્છેદક્ષમં ભવેત્ ॥૮॥

**માધ્યસ્થ્યાષ્ટકમ્-૧૬**

સ્થીયતામનુપાલમ્ભં, મધ્યસ્થેનાન્તરાત્મના ।

jainuniversity.org
સર્વ જ્ઞાનાય ભવતુ

કુતર્કકર્કરક્ષૈપૈ,-સ્ત્યજ્યતાં બાલચાપલમ્ ॥૧॥
મનોવત્સો યુક્તિગવીં, મધ્યસ્થસ્યાનુધાવતિ ।
તામાકર્ષતિ પુચ્છેન, તુચ્છાગ્રહમનઃકપિઃ ॥૨॥
નયેષુ સ્વાર્થસત્યેષુ, મોઘેષુ પરચાલને ।
સમશીલં મનો યસ્ય, સ મધ્યસ્થો મહામુનિઃ ॥૩॥
સ્વસ્વકર્મકૃતાવેશાઃ, સ્વસ્વકર્મભુજો નરાઃ ।
ન રાગં નાપિ ચ દ્વેષં, મધ્યસ્થસ્તેષુ ગચ્છતિ ॥૪॥
મનઃ સ્યાદ્ વ્યાપૃતં યાવત્, પરદોષગુણગ્રહે ।
કાર્યં વ્યગ્રં વરં તાવન્,-મધ્યસ્થેનાત્મભાવને ॥૫॥
વિભિન્ના અપિ પન્થાનઃ, સમુદ્રં સરિતામિવ ।
મધ્યસ્થાનાં પરં બ્રહ્મ, પ્રાપ્નુવન્ત્યેકમક્ષયમ્ ॥૬॥
સ્વાગમં રાગમાત્રેણ, દ્વેષમાત્રાત્ પરાગમમ્ ।
ન શ્રયામસ્ત્યજામો વા, કિન્તુ મધ્યસ્થયા દૃશા ॥૭॥
મધ્યસ્થયા દૃશા સર્વે,-ષ્વપુનર્બન્ધકાદિષુ ।
ચારિસંજીવનીચાર,-ન્યાયાદાશાસ્મહે હિતમ્ ॥૮॥

## નિર્ભયાષ્ટકમ્-૧૭

યસ્ય નાસ્તિ પરાપેક્ષા, સ્વભાવાદ્વૈતગામિનઃ ।
તસ્ય કિં ન ભયભ્રાન્તિ,-ક્લાન્તિસંતાનતાનવમ્? ॥૧॥
ભવસૌખ્યેન કિં ભૂરિ,- ભયજ્વલનભસ્મના? ।
સદા ભયોજ્ઝિતં જ્ઞાન,-સુખમેવ વિશિષ્યતે ॥૨॥
ન ગોપ્યં ક્વાપિ નારોપ્યં, હેયં દેયં ચ ન ક્વચિત્ ।
ક્વ ભયેન મુનેઃ સ્થેયં, જ્ઞેયં જ્ઞાનેન પશ્યતઃ? ॥૩॥
એકં બ્રહ્માસ્ત્રમાદાય, નિઘ્નન્મોહચમૂં મુનિઃ ।
બિભેતિ નૈવ સંગ્રામ,-શીર્ષસ્થ ઇવ નાગરાટ્ ॥૪॥
મયૂરી જ્ઞાનદૃષ્ટિશ્ચેત્, પ્રસર્પતિ મનોવને ।
વેષ્ટનં ભયસર્પાણાં, ન તદાનન્દચન્દને ॥૫॥
કૃતમોહાસ્ત્રવૈફલ્યં, જ્ઞાનવર્મ બિભર્તિ યઃ ।
ક્વ ભીસ્તસ્ય ક્વ વા ભઙ્ગઃ, કર્મસઙ્ગરકેલિષુ? ॥૬॥
તૂલવલ્લઘવો મૂઢા, ભ્રમન્ત્યભ્રે ભયાનિલૈઃ ।
નૈકં રોમાપિ તૈર્જ્ઞાન,-ગરિષ્ઠાનાં તુ કમ્પતે ॥૭॥
ચિત્તે પરિણતં યસ્ય, ચારિત્રમકુતોભયમ્ ।
અખણ્ડજ્ઞાનરાજ્યસ્ય, તસ્ય સાધોઃ કુતો ભયમ્ ॥૮॥

## આત્મપ્રશંસાત્યાગાષ્ટકમ્-૧૮

ગુણૈર્યદિ ન પૂર્ણોઽસિ, કૃતમાત્મપ્રશંસયા ।
ગુણૈરેવાસિ પૂર્ણશ્ચેત્, કૃતમાત્મપ્રશંસયા ॥૧॥
શ્રેયોદ્રુમસ્ય મૂલાનિ, સ્વોત્કર્ષામ્ભઃપ્રવાહતઃ ।
પુણ્યાનિ પ્રકટીકુર્વન્, ફલં કિં સમવાપ્સ્યસિ ॥૨॥
આલમ્બિતા હિતાય સ્યુઃ, પરૈઃ સ્વગુણરશ્મયઃ ।
અહો સ્વયં ગૃહીતાસ્તુ, પાતયન્તિ ભવોદધૌ ॥૩॥
ઉચ્ચત્વદૃષ્ટિદોષોત્થ,-સ્વોત્કર્ષજ્વરશાન્તિકમ્ ।
પૂર્વપુરુષસિંહેભ્યો, ભૃશં નીચત્વભાવનમ્ ॥૪॥
શરીરરૂપલાવણ્ય,-ગ્રામારામધનાદિભિઃ ।
ઉત્કર્ષઃ પરપર્યાયૈ,-શ્ચિદાનન્દઘનસ્ય કઃ? ॥૫॥

શુદ્ધાઃ પ્રત્યાત્મસામ્યેન, પર્યાયાઃ પરિભાવિતાઃ
અશુદ્ધાશ્ચાપકૃષ્ટત્વાન્,-નોત્કર્ષાય મહામુનેઃ ॥૬॥
ક્ષોભં ગચ્છન્ સમુદ્રોઽપિ, સ્વોત્કર્ષપવનેરિતઃ ।
ગુણૌઘાન્ બુદ્બુદીકૃત્ય, વિનાશયસિ કિં મુધા? ॥૭॥
નિરપેક્ષાનવચ્છિન્ના,-ઽનન્તચિન્માત્રમૂર્તયઃ ।
યોગિનો ગલિતોત્કર્ષા,-ઽપકર્ષાનલ્પકલ્પનાઃ ॥૮॥

## તત્ત્વદૃષ્ટ્યષ્ટકમ્-૧૯

રૂપે રૂપવતી દૃષ્ટિ,-ર્દૃષ્ટ્વા રૂપં વિમુહ્યતિ ।
મજ્જત્યાત્મનિ નીરૂપે, તત્ત્વદૃષ્ટિસ્ત્વરૂપિણી ॥૧॥
ભ્રમવાટી બહિર્દૃષ્ટિ,-ર્ભ્રમચ્છાયા તદીક્ષણમ્ ।
અભ્રાન્તસ્તત્વદૃષ્ટિસ્તુ, નાસ્યાં શેતે સુખાશયા ॥૨॥
ગ્રામારામાદિ મોહાય, યદ્ દૃષ્ટં બાહ્યયા દૃશા ।
તત્ત્વદૃષ્ટ્યા તદેવાન્ત-ર્નીતં વૈરાગ્યસંપદે ॥૩॥
બાહ્યદૃષ્ટેઃ સુધાસાર,-ઘટિતા ભાતિ સુન્દરી ।
તત્ત્વદૃષ્ટેસ્તુ સા સાક્ષાદ્, વિણ્મૂત્રપિઠરોદરી ॥૪॥
લાવણ્યલહરીપુણ્યં, વપુઃ પશ્યતિ બાહ્યદૃગ્ ।
તત્ત્વદૃષ્ટિઃ શ્વકાકાનાં, ભક્ષ્યં કૃમિકુલાકુલમ્ ॥૫॥
ગજાશ્વૈર્ભૂપભવનં, વિસ્મયાય બહિર્દૃશઃ ।
તત્રાશ્વેભવનાત્ કોઽપિ, ભેદસ્તત્ત્વદૃશસ્તુ ન ॥૬॥
ભસ્મના કેશલોચેન, વપુર્ધૃતમલેન વા ।
મહાન્તં બાહ્યદૃગ્વેત્તિ, ચિત્સામ્રાજ્યેન તત્ત્વવિત્ ॥૭॥
ન વિકારાય વિશ્વસ્યો,-પકારાયૈવ નિર્મિતાઃ ।
સ્ફુરત્કારુણ્યપીયૂષ,-વૃષ્ટયસ્તત્ત્વદૃષ્ટયઃ ॥૮॥

## સર્વસમૃદ્ધ્યષ્ટકમ્-૨૦

બાહ્યદૃષ્ટિપ્રચારેષુ, મુદ્રિતેષુ મહાત્મનઃ ।
અન્તરેવાવભાસન્તે, સ્ફુટાઃ સર્વાઃ સમૃદ્ધયઃ ॥૧॥
સમાધિર્નન્દનં ધૈર્યં, દમ્ભોલિઃ સમતા શચી ।
જ્ઞાનં મહાવિમાનં ચ, વાસવશ્રીરિયં મુનેઃ ॥૨॥
વિસ્તારિતક્રિયાજ્ઞાન,-ચર્મચ્છત્રો નિવારયન્ ।
મોહમ્લેચ્છમહાવૃષ્ટિં, ચક્રવર્તી ન કિં મુનિઃ? ॥૩॥
નવબ્રહ્મસુધાકુણ્ડ-, નિષ્ઠાધિષ્ઠાયકો મુનિઃ ।
નાગલોકેશવદ્ ભાતિ, ક્ષમાં રક્ષન્ પ્રયત્નતઃ ॥૪॥
મુનિરધ્યાત્મકૈલાશે, વિવેકવૃષભસ્થિતઃ ।
શોભતે વિરતિજ્ઞપ્તિ,-ગઙ્ગાગૌરીયુતઃ શિવઃ ॥૫॥
જ્ઞાનદર્શનચન્દ્રાર્ક-નેત્રસ્ય નરકચ્છિદઃ ।
સુખસાગરમગ્નસ્ય, કિં ન્યૂનં યોગિનો હરેઃ? ॥૬॥
યા સૃષ્ટિર્બ્રહ્મણો બાહ્યા, બાહ્યાપેક્ષાવલમ્બિની ।
મુનેઃ પરાનપેક્ષાઽન્ત,-ર્ગુણસૃષ્ટિસ્તતોઽધિકા ॥૭॥
રત્નૈસ્ત્રિભિઃ પવિત્રા યા, સ્રોતોભિરિવ જાહ્નવી ।
સિદ્ધયોગસ્ય સાપ્યર્હત્,-પદવી ન દવીયસી ॥૮॥

## કર્મવિપાકચિન્તનાષ્ટકમ્-૨૧

દુઃખં પ્રાપ્ય ન દીનઃ સ્યાત્, સુખં પ્રાપ્ય ચ વિસ્મિતઃ ।
મુનિઃ કર્મવિપાકસ્ય, જાનન્ પરવશં જગત્ ॥૧॥

jainuniversity.org

યેષાં ભ્રૂભઙ્ગમાત્રેણ, ભજ્યન્તે પર્વતા અપિ ।
તૈરહો કર્મવૈષમ્યે, ભૂપૈર્ભિક્ષાપિ નાપ્યતે ॥૨॥
જાતિચાતુર્યહીનોઽપિ, કર્મણ્યભ્યુદયાવહે ।
ક્ષણાદ્રઙ્કોઽપિ રાજા સ્યા,-ચ્છત્રચ્છન્નદિગન્તરઃ ॥૩॥
વિષમા કર્મણઃ સૃષ્ટિ,-ર્દૃષ્ટા કરભપૃષ્ઠવત્ ।
જાત્યાતિભૂતિવૈષમ્યાત્, કા રતિસ્તત્ર યોગિનઃ? ॥૪॥
આરૂઢાઃ પ્રશમશ્રેણિં, શ્રુતકેવલિનોઽપિ ચ ।
ભ્રામ્યન્તેઽનન્તસંસાર-મહો દુષ્ટેન કર્મણા ॥૫॥
અર્વાક્ સર્વાપિ સામગ્રી, શ્રાન્તેવ પરિતિષ્ઠતિ ।
વિપાકઃ કર્મણઃ કાર્ય,-પર્યન્તમનુધાવતિ ॥૬॥
અસાવચરમાવર્તે, ધર્મં હરતિ પશ્યતઃ ।
ચરમાવર્તિસાધોસ્તુ,- ચ્છલમન્વિષ્ય હૃષ્યતિ ॥૭॥
સામ્યં બિભર્તિ યઃ કર્મ,- વિપાકં હૃદિ ચિન્તયન્ ।
સ એવ સ્યાચ્ચિદાનન્દ,-મકરન્દમધુવ્રતઃ ॥૮॥

## ભવોદ્વેગાષ્ટકમ્-૨૨

યસ્ય ગમ્ભીરમધ્યસ્યા,-જ્ઞાનવજ્રમયં તલમ્ ।
રુદ્ધા વ્યસનશૈલૌઘૈઃ, પન્થાનો યત્ર દુર્ગમાઃ ॥૧॥
પાતાલકલશા યત્ર, ભૃતાસ્તૃષ્ણામહાનિલૈઃ ।
કષાયાશ્ચિત્તસંકલ્પ,-વેલાવૃદ્ધિં વિતન્વતે ॥૨॥
સ્મરૌર્વાગ્નિર્જ્વલત્યન્ત,-ર્યત્ર સ્નેહેન્ધનઃ સદા ।
યો ઘોરરોગશોકાદિ-મત્સ્યકચ્છપસંકુલઃ ॥૩॥
દુર્બુદ્ધિમત્સરદ્રોહૈ,-ર્વિદ્યુદ્દુર્વાતગર્જિતૈઃ ।
યત્ર સાંયાત્રિકા લોકાઃ, પતન્ત્યુત્પાતસંકટે ॥૪॥
જ્ઞાની તસ્માદ્ ભવામ્ભોધે-, ર્નિત્યોદ્વિગ્નોઽતિદારુણાત્ ।
તસ્ય સંતરણોપાયં, સર્વયત્નેન કાઙ્ક્ષતિ ॥૫॥
તૈલપાત્રધરો યદ્વદ્, રાધાવેધોદ્યતો યથા ।
ક્રિયાસ્વનન્યચિત્તઃ સ્યાદ્, ભવભીતસ્તથા મુનિઃ ॥૬॥
વિષં વિષસ્ય વહ્નેશ્ચ, વહ્નિરેવ યદૌષધમ્ ।
તત્સત્યં ભવ ભીતાના,-મુપસર્ગેઽપિ યન્ન ભીઃ ॥૭॥
સ્થૈર્યં ભવભયાદેવ, વ્યવહારે મુનિર્વ્રજેત્ ।
સ્વાત્મારામસમાધૌ તુ, તદપ્યન્તર્નિમજ્જતિ ॥૮॥

## લોકસંજ્ઞાત્યાગાષ્ટકમ્-૨૩

પ્રાપ્તઃ ષષ્ઠં ગુણસ્થાનં, ભવદુર્ગાદ્રિલઙ્ઘનમ્ ।
લોકસંજ્ઞારતો ન સ્યાન્, મુનિર્લોકોત્તરસ્થિતિઃ ॥૧॥
યથા ચિન્તામણિં દત્તે, બઠરો બદરીફલૈઃ ।
હહા! જહાતિ સદ્ધર્મં, તથૈવ જનરઞ્જનૈઃ ॥૨॥
લોકસંજ્ઞામહાનદ્યા,-મનુસ્રોતોઽનુગા ન કે? ।
પ્રતિસ્રોતોઽનુગસ્ત્વેકો, રાજહંસો મહામુનિઃ ॥૩॥
લોકમાલમ્બ્ય કર્ત્તવ્યં, કૃતં બહુભિરેવ ચેત્ ।
તદા મિથ્યાદૃશાં ધર્મો, ન ત્યાજ્યઃ સ્યાત્ કદાચન ॥૪॥
શ્રેયોઽર્થિનો હિ ભૂયાંસો, લોકે લોકોત્તરે ચ ન ।
સ્તોકા હિ રત્નવણિજઃ, સ્તોકાશ્ચ સ્વાત્મસાધકાઃ ॥૫॥

jainuniversity.org

લોકસંજ્ઞાહતા હન્ત! નીચૈર્ગમનદર્શનૈઃ ।
શંસયન્તિ સ્વસત્યાઙ્ગ,-મર્મઘાતમહાવ્યથામ્ ॥૬॥
આત્મસાક્ષિકસદ્ધર્મ,-સિદ્ધૌ કિં લોકયાત્રયા ।
તત્ર પ્રસન્નચન્દ્રશ્ચ, ભરતશ્ચ નિદર્શનમ્ ॥૭॥
લોકસંજ્ઞોજ્ઝિતઃ સાધુઃ, પરબ્રહ્મસમાધિમાન્ ।
સુખમાસ્તે ગતદ્રોહ,-મમતામત્સરજ્વરઃ ॥૮॥

**શાસ્ત્રદષ્ટ્યષ્ટકમ્-૨૪**

ચર્મચક્ષુર્ભૃતઃ સર્વે, દેવાશ્ચાવધિચક્ષુષઃ ।
સર્વતશ્ચક્ષુષઃ સિદ્ધાઃ, સાધવઃ શાસ્ત્રચક્ષુષઃ ॥૧॥
પુરઃ સ્થિતાનિવોર્ધ્વાધસ્,-તિર્યગ્લોકવિવર્ત્તિનઃ ।
સર્વાન્ ભાવાનવેક્ષન્તે, જ્ઞાનિનઃ શાસ્ત્રચક્ષુષા ॥૨॥
શાસનાત્ ત્રાણશક્તેશ્ચ, બુધૈઃ શાસ્ત્રં નિરુચ્યતે ।
વચનં વીતરાગસ્ય, તત્તુ નાન્યસ્ય કસ્યચિત્ ॥૩॥
શાસ્ત્રે પુરસ્કૃતે તસ્માદ્, વીતરાગઃ પુરસ્કૃતઃ ।
પુરસ્કૃતે પુનસ્તસ્મિન્, નિયમાત્ સર્વસિદ્ધયઃ ॥૪॥
અદષ્ટાર્થેઽનુધાવન્તઃ, શાસ્ત્રદીપં વિના જડાઃ ।
પ્રાપ્નુવન્તિ પરં ખેદં, પ્રસ્ખલન્તઃ પદે પદે ॥૫॥
શુદ્ધોઞ્છાદ્યપિ શાસ્ત્રાજ્ઞા,-નિરપેક્ષસ્ય નો હિતમ્ ।
ભૌતહન્તુર્યથા તસ્ય, પદસ્પર્શનિવારણમ્ ॥૬॥
અજ્ઞાનાહિમહામન્ત્રં, સ્વાચ્છન્દ્યજ્વરલઙ્ઘનમ્ ।
ધર્મારામસુધાકુલ્યાં, શાસ્ત્રમાહુર્મહર્ષયઃ ॥૭॥
શાસ્ત્રોક્તાચારકર્તા ચ, શાસ્ત્રજ્ઞઃ શાસ્ત્રદેશકઃ ।
શાસ્ત્રૈકદૃઙ્મહાયોગી, પ્રાપ્નોતિ પરમં પદમ્ ॥૮॥

**પરિગ્રહાષ્ટકમ્-૨૫**

ન પરાવર્તતે રાશે,-ર્વક્રતાં જાતુ નોજ્ઝતિ ।
પરિગ્રહગ્રહઃ કોઽયં, વિડમ્બિતજગત્ત્રયઃ? ॥૧॥
પરિગ્રહગ્રહાવેશાદ્, દુર્ભાષિતરજઃકિરામ્ ।
શ્રૂયન્તે વિકૃતાઃ કિં ન, પ્રલાપા લિઙ્ગિનામપિ? ॥૨॥
યસ્ત્યક્ત્વા તૃણવદ્ બાહ્ય,-માન્તરં ચ પરિગ્રહમ્ ।
ઉદાસ્તે તત્પદામ્ભોજં, પર્યુપાસ્તે જગત્ત્રયી ॥૩॥
ચિત્તેઽન્તર્ગ્રન્થગહને, બહિર્નિર્ગ્રન્થતા વૃથા ।
ત્યાગાત્કઞ્ચુકમાત્રસ્ય, ભુજગો નહિ નિર્વિષઃ ॥૪॥
ત્યક્તે પરિગ્રહે સાધોઃ, પ્રયાતિ સકલં રજઃ ।
પાલિત્યાગે ક્ષણાદેવ, સરસઃ સલિલં યથા ॥૫॥
ત્યક્તપુત્રકલત્રસ્ય, મૂર્ચ્છામુક્તસ્ય યોગિનઃ ।
ચિન્માત્રપ્રતિબદ્ધસ્ય, કા પુદ્ગલનિયન્ત્રણા? ॥૬॥
ચિન્માત્રદીપકો ગચ્છેદ્, નિર્વાતસ્થાનસન્નિભૈઃ ।
નિષ્પરિગ્રહતાસ્થૈર્યં, ધર્મોપકરણૈરપિ ॥૭॥
મૂર્ચ્છાચ્છન્નધિયાં સર્વં, જગદેવ પરિગ્રહઃ ।
મૂર્ચ્છયા રહિતાનાં તુ, જગદેવાપરિગ્રહઃ ॥૮॥

**અનુભવાષ્ટકમ્-૨૬**

સન્ધ્યેવ દિનરાત્રિભ્યાં, કેવલશ્રુતયોઃ પૃથક્ ।
બુધૈરનુભવો દષ્ટઃ, કેવલાર્કારુણોદયઃ ॥૧॥

jainuniversity.org

વ્યાપારઃ સર્વશાસ્ત્રાણાં, દિક્પ્રદર્શનમેવ હિ ।
પારં તુ પ્રાપયત્યેકો-, ઽનુભવો ભવવારિધેઃ ॥૨॥
અતીન્દ્રિયં પરં બ્રહ્મ, વિશુદ્ધાનુભવં વિના ।
શાસ્ત્રયુક્તિશતેનાપિ, ન ગમ્યં યદ્ બુધા જગુઃ ॥૩॥
જ્ઞાયેરન્ હેતુવાદેન, પદાર્થા યદ્યતીન્દ્રિયાઃ ।
કાલેનૈતાવતા પ્રાજ્ઞૈઃ, કૃતઃ સ્યાત્તેષુ નિશ્ચયઃ ॥૪॥
કેષાં ન કલ્પનાદર્વી, શાસ્ત્રક્ષીરાન્નગાહિની ।
વિરલાસ્તદ્રસાસ્વાદ-વિદોઽનુભવજિહ્વયા ॥૫॥
પશ્યતુ બ્રહ્મ નિર્દ્વન્દ્વં, નિર્દ્વન્દ્વાનુભવં વિના ।
કથં લિપિમયી દૃષ્ટિ,-ર્વાઙ્મયી વા મનોમયી? ॥૬॥
ન સુષુપ્તિરમોહત્વાદ્, નાપિ ચ સ્વાપજાગરૌ ।
કલ્પનાશિલ્પવિશ્રાન્તે,-સ્તુર્યૈવાનુભવો દશા ॥૭॥
અધિગત્યાખિલં શબ્દ,-બ્રહ્મ શાસ્ત્રદશા મુનિઃ ।
સ્વસંવેદ્યં પરં બ્રહ્મા-નુભવેનાધિગચ્છતિ ॥૮॥

**યોગાષ્ટકમ્-૨૭**

મોક્ષેણ યોજનાદ્યોગઃ, સર્વોઽપ્યાચાર ઇષ્યતે ।
વિશિષ્ય સ્થાનવર્ણાર્થા,-લમ્બનૈકાગ્ર્યગોચરઃ ॥૧॥
કર્મયોગદ્વયં તત્ર, જ્ઞાનયોગત્રયં વિદુઃ ।
વિરતેષ્વેવ નિયમાદ્, બીજમાત્રં પરેષ્વપિ ॥૨॥
કૃપાનિર્વેદસંવેગ,-પ્રશમોત્પત્તિકારિણઃ ।
ભેદાઃ પ્રત્યેકમત્રેચ્છા,-પ્રવૃત્તિસ્થિરસિદ્ધયઃ ॥૩॥
ઇચ્છા તદ્વત્કથાપ્રીતિઃ, પ્રવૃત્તિઃ પાલનં પરમ્ ।
સ્થૈર્યં બાધકભીહાનિઃ, સિદ્ધિરન્યાર્થસાધનમ્ ॥૪॥
અર્થાલમ્બનયોશ્ચૈત્ય,-વન્દનાદૌ વિભાવનમ્ ।
શ્રેયસે યોગિનઃ સ્થાન,-વર્ણયોર્યત્ન એવ ચ ॥૫॥
આલમ્બનમિહ જ્ઞેયં, દ્વિવિધં રૂપ્યરૂપિ ચ ।
અરૂપિગુણસાયુજ્ય,-યોગોઽનાલમ્બનઃ પરઃ ॥૬॥
પ્રીતિભક્તિવચોઽસઙ્ગૈઃ, સ્થાનાદ્યપિ ચતુર્વિધમ્ ।
તસ્માદયોગયોગાપ્તે,-ર્મોક્ષયોગઃ ક્રમાદ્ ભવેત્ ॥૭॥
સ્થાનાદ્યયોગિનસ્તીર્થો,-ચ્છેદાદ્યાલમ્બનાદપિ ।
સૂત્રદાને મહાદોષ, ઇત્યાચાર્યાઃ પ્રચક્ષતે ॥૮॥

**નિયાગાષ્ટકમ્-૨૮**

યઃ કર્મ હુતવાન્ દીપ્તે, બ્રહ્માગ્નૌ ધ્યાનધાય્યયા ।
સ નિશ્ચિતેન યાગેન, નિયાગપ્રતિપત્તિમાન્ ॥૧॥
પાપધ્વંસિનિ નિષ્કામે, જ્ઞાનયજ્ઞે રતો ભવ! ।
સાવદ્યૈઃ કર્મયજ્ઞૈઃ કિં, ભૂતિકામનયાવિલૈઃ? ॥૨॥
વેદોક્તત્વાન્ મનઃશુદ્ધ્યા, કર્મયજ્ઞોઽપિ યોગિનઃ ।
બ્રહ્મયજ્ઞ ઇતીચ્છન્તઃ, શ્યેનયાગં ત્યજન્તિ કિમ્? ॥૩॥
બ્રહ્મયજ્ઞઃ પરં કર્મ, ગૃહસ્થસ્યાધિકારિણઃ ।
પૂજાદિ વીતરાગસ્ય, જ્ઞાનમેવ તુ યોગિનઃ ॥૪॥
ભિન્નોદ્દેશેન વિહિતં, કર્મ કર્મક્ષયાક્ષમમ્ ।
ક્લૃપ્તભિન્નાધિકારં ચ, પુત્રેષ્ટ્યાદિવદિષ્યતામ્ ॥૫॥
બ્રહ્માર્પણમપિ બ્રહ્મ,-યજ્ઞાન્તર્ભાવસાધનમ્ ।

JainUniversity.org

બ્રહ્માગ્નૌ કર્મણો યુક્તં, સ્વકૃતત્વસ્મયે હુતે ||૬||
બ્રહ્મણ્યર્પિતસર્વસ્વો, બ્રહ્મદગ્ બ્રહ્મસાધનઃ ।
બ્રહ્મણા જુહ્વદબ્રહ્મ, બ્રહ્મણિ બ્રહ્મગુપ્તિમાન્ ||૭||
બ્રહ્માધ્યયનનિષ્ઠાવાન્, પરબ્રહ્મસમાહિતઃ ।
બ્રાહ્મણો લિપ્યતે નાઘૈ,-ર્નિયાગ-પ્રતિપત્તિમાન્ ||૮||

**ભાવપૂજાષ્ટકમ્-૨૯**

દયામ્ભસા કૃતસ્નાનઃ, સંતોષશુભવસ્ત્રભૃત્ ।
વિવેકતિલકભ્રાજી, ભાવનાપાવનાશયઃ ||૧||
ભક્તિશ્રદ્ધાનઘુસૃણોન્,-મિશ્રપાટીરજદ્રવૈઃ ।
નવબ્રહ્માઙ્ગતો દેવં, શુદ્ધમાત્માનમર્ચય ||૨||
ક્ષમાપુષ્પસ્રજં ધર્મ,-યુગ્મક્ષૌમદ્વયં તથા ।
ધ્યાનાભરણસારં ચ, તદઙ્ગે વિનિવેશય ||૩||
મદસ્થાનભિદાત્યાગૈ-, ર્લિખાગ્રે ચાષ્ટમઙ્ગલીમ્ ।
જ્ઞાનાગ્નૌ શુભસંકલ્પ,- કાકતુણ્ડં ચ ધૂપય ||૪||
પ્રાગ્ધર્મલવણોત્તારં, ધર્મસન્યાસવહ્નિના ।
કુર્વન્ પૂરય સામર્થ્ય,-રાજન્નીરાજનાવિધિમ્ ||૫||
સ્ફુરન્ મઙ્ગલદીપં ચ, સ્થાપયાનુભવં પુરઃ ।
યોગનૃત્યપરસ્તૌર્ય,-ત્રિકસંયમવાન્ ભવ ||૬||
ઉલ્લસન્ મનસઃ સત્ય,-ઘણ્ટાં વાદયતસ્તવ ।
ભાવપૂજારતસ્યેત્થં, કરક્રોડે મહોદયઃ ||૭||
દ્રવ્યપૂજોચિતા ભેદો,-પાસના ગૃહમેધિનામ્ ।
ભાવપૂજા તુ સાધૂના,-મભેદોપાસનાત્મિકા ||૮||

**ધ્યાનાષ્ટકમ્-૩૦**

ધ્યાતા ધ્યેયં તથા ધ્યાનં, ત્રયં યસ્યૈકતાં ગતમ્ ।
મુનેરનન્યચિત્તસ્ય, તસ્ય દુઃખં ન વિદ્યતે ||૧||
ધ્યાતાન્તરાત્મા ધ્યેયસ્તુ, પરમાત્મા પ્રકીર્તિતઃ ।
ધ્યાનં ચૈકાગ્ર્યસંવિત્તિઃ, સમાપત્તિસ્તદેકતા ||૨||
મણાવિવ પ્રતિચ્છાયા, સમાપત્તિઃ પરાત્મનઃ ।
ક્ષીણવૃત્તૌ ભવેદ્ ધ્યાના,-દન્તરાત્મનિ નિર્મલે ||૩||
આપત્તિશ્ચ તતઃ પુણ્ય,-તીર્થકૃત્કર્મબન્ધતઃ ।
તદ્ભાવાભિમુખત્વેન, સંપત્તિશ્ચ ક્રમાદ્ ભવેત્ ||૪||
ઇત્થં ધ્યાનફલાદ્યુક્તં, વિંશતિસ્થાનકાદ્યપિ ।
કષ્ટમાત્રં ત્વભવ્યાના,-મપિ નો દુર્લભં ભવે ||૫||
જિતેન્દ્રિયસ્ય ધીરસ્ય, પ્રશાન્તસ્ય સ્થિરાત્મનઃ ।
સુખાસનસ્ય નાસાગ્ર,-ન્યસ્તનેત્રસ્ય યોગિનઃ ||૬||
રુદ્ધબાહ્યમનોવૃત્તે-ર્ધારણાધારયા રયાત્ ।
પ્રસન્નસ્યાઽપ્રમત્તસ્ય, ચિદાનન્દસુધાલિહઃ ||૭||
સામ્રાજ્યમપ્રતિદ્વન્દ્વ-,મન્તરેવ વિતન્વતઃ ।
ધ્યાનિનો નોપમા લોકે, સદેવમનુજેઽપિ હિ ||૮||

**તપોઽષ્ટકમ્-૩૧**

જ્ઞાનમેવ બુધાઃ પ્રાહુઃ, કર્મણાં તાપનાત્તપઃ ।
તદાભ્યન્તરમેવેષ્ટં, બાહ્યં તદુપબૃંહકમ્ ||૧||
આનુસ્રોતસિકી વૃત્તિ-ર્બાલાનાં સુખશીલતા ।

પ્રાતિસ્રોતસિકી વૃત્તિ,-ર્જ્ઞાનિનાં પરમં તપઃ ॥૨॥
ધનાર્થિનાં યથા નાસ્તિ, શીતતાપાદિ દુઃસહમ્ ।
તથા ભવવિરક્તાનાં, તત્ત્વજ્ઞાનાર્થિનામપિ ॥૩॥
સદુપાયપ્રવૃત્તાના,-મુપેયમધુરત્વતઃ ।
જ્ઞાનિનાં નિત્યમાનન્દ,-વૃદ્ધિરેવ તપસ્વિનામ્ ॥૪॥
ઇત્થં ચ દુઃખરૂપત્વાત્, તપો વ્યર્થમિતીચ્છતામ્ ।
બૌદ્ધાનાં નિહતા બુદ્ધિ,-ર્બૌદ્ધાનન્દાऽપરિક્ષયાત્ ॥૫॥
યત્ર બ્રહ્મ જિનાર્ચા ચ, કષાયાણાં તથા હતિઃ ।
સાનુબન્ધા જિનાજ્ઞા ચ, તત્તપઃ શુદ્ધમિષ્યતે ॥૬॥
તદેવ હિ તપઃ કાર્યં, દુર્ધ્યાનં યત્ર નો ભવેત્ ।
યેન યોગા ન હીયન્તે, ક્ષીયન્તે નેન્દ્રિયાણિ ચ ॥૭॥
મૂલોત્તરગુણશ્રેણિ,-પ્રાજ્યસામ્રાજ્ય સિદ્ધયે ।
બાહ્યમાભ્યન્તરં ચેત્થં, તપઃ કુર્યાન્મહામુનિઃ ॥૮॥

## સર્વનયાષ્ટકમ્-૩૨

ધાવન્તોऽપિ નયાઃ સર્વે, સ્યુર્ભાવે કૃતવિશ્રમાઃ ।
ચારિત્રગુણલીનઃ સ્યા,-દિતિ સર્વનયાશ્રિતઃ ॥૧॥
પૃથઙ્નયા મિથઃ પક્ષ,-પ્રતિપક્ષકદર્થિતાઃ ।
સમવૃત્તિસુખાસ્વાદી, જ્ઞાની સર્વનયાશ્રિતઃ ॥૨॥
નાપ્રમાણં પ્રમાણં વા, સર્વમપ્યવિશેષિતમ્ ।
વિશેષિતં પ્રમાણં સ્યા,-દિતિ સર્વનયજ્ઞતા ॥૩॥
લોકે સર્વનયજ્ઞાનાં, તાટસ્થ્યં વાપ્યનુગ્રહઃ ।
સ્યાત્ પૃથઙ્નયમૂઢાનાં, સ્મયાર્તિર્વાતિવિગ્રહઃ ॥૪॥
શ્રેયઃ સર્વનયજ્ઞાનાં, વિપુલં ધર્મવાદતઃ ।
શુષ્કવાદાદ્વિવાદાચ્ચ, પરેષાં તુ વિપર્યયઃ ॥૫॥
પ્રકાશિતં જિનાનાં યૈ,-ર્મતં સર્વનયાશ્રિતમ્ ।
ચિત્તે પરિણતં ચેદં, યેષાં તેભ્યો નમો નમઃ ॥૬॥
નિશ્ચયે વ્યવહારે ચ, ત્યક્ત્વા જ્ઞાને ચ કર્મણિ ।
એક પાક્ષિકવિશ્લેષ,-મારૂઢાઃ શુદ્ધભૂમિકામ્ ॥૭॥
અમૂઢલક્ષ્યાઃ સર્વત્ર, પક્ષપાતવિવર્જિતાઃ ।
જયન્તિ પરમાનન્દ-મયાઃ સર્વનયાશ્રયાઃ ॥૮॥

## ઉપસંહાર

પૂર્ણો મગ્નઃ સ્થિરોऽમોહો, જ્ઞાની શાન્તો જિતેન્દ્રિયઃ ।
ત્યાગી ક્રિયાપરસ્તૃપ્તો, નિર્લેપો નિઃસ્પૃહો મુનિઃ ॥૧॥
વિદ્યાવિવેકસંપન્નો, મધ્યસ્થો ભયવર્જિતઃ ।
અનાત્મશંસકસ્તત્ત્વ,-દૃષ્ટિઃ સર્વસમૃદ્ધિમાન્ ॥૨॥
ધ્યાતા કર્મવિપાકાના,-મુદ્વિગ્નો ભવ વારિધેઃ ।
લોકસંજ્ઞાવિનિર્મુક્તઃ, શાસ્ત્રદૃગ્ નિષ્પરિગ્રહઃ ॥૩॥
શુદ્ધાનુભવવાન્ યોગી, નિયાગપ્રતિપત્તિમાન્ ।
ભાવાર્ચાધ્યાનતપસાં, ભૂમિઃ સર્વનયાશ્રિતઃ ॥૪॥
સ્પષ્ટં નિષ્ટઙ્કિતં તત્ત્વ,-મષ્ટકૈઃ પ્રતિપન્નવાન્ ।
મુનિર્મહોદયં જ્ઞાન,-સારં સમધિગચ્છતિ ॥૫॥
નિર્વિકારં નિરાબાધં, જ્ઞાનસારમુપેયુષામ્ ।

Jainuniversity.org
सर्व ज्ञानाय भवतु

વિનિવૃત્તપરાશાનાં, મોક્ષોઽત્રૈવ મહાત્મનામ્ ॥૬॥
ચિત્તમાર્દ્રીકૃતં જ્ઞાન,-સારસારસ્વતોર્મિભિઃ ।
નાપ્નોતિ તીવ્રમોહાગ્નિ,-પ્લોષશોષકદર્થનામ્ ॥૭॥
અચિન્ત્યા કાપિ સાધૂનાં, જ્ઞાનસારગરિષ્ઠતા ।
ગતિર્યયોર્ધ્વમેવ સ્યા,-દધઃ પાતઃ કદાપિ ન ॥૮॥
ક્લેશક્ષયો હિ મણ્ડૂક,-ચૂર્ણતુલ્યઃ ક્રિયાકૃતઃ ।
દગ્ધતચ્ચૂર્ણસદૃશો, જ્ઞાનસારકૃતઃ પુનઃ ॥૯॥
જ્ઞાનપૂતાં પરેઽપ્યાહુઃ, ક્રિયાં હેમઘટોપમામ્ ।
યુક્તં તદપિ તદ્ભાવં, ન યદ્ભગ્નાપિ સોજ્ઝતિ ॥૧૦॥
ક્રિયાશૂન્યં ચ યજ્જ્ઞાનં, જ્ઞાનશૂન્યા ચ યા ક્રિયા ।
અનયોરન્તરં જ્ઞેયં, ભાનુખદ્યોતયોરિવ ॥૧૧॥
ચારિત્રં વિરતિઃ પૂર્ણા, જ્ઞાનસ્યોત્કર્ષ એવ હિ ।
જ્ઞાનાદ્વૈતનયે દૃષ્ટિ,-ર્દેયા તદ્યોગસિદ્ધયે ॥૧૨॥

**ગ્રન્થકૃત્પ્રશસ્તિઃ**

સિદ્ધિં સિદ્ધપુરે પુરન્દરપુરસ્પર્ધાવહે લબ્ધવાં-
શ્ચિદ્દીપોઽયમુદારસારમહસા દીપોત્સવે પર્વણિ ।
એતદ્ભાવનભાવપાવનમનશ્ચચ્ચચ્ચમત્કારિણાં,
તૈસ્તૈર્દીપશતૈઃ સુનિશ્ચયમતૈર્નિત્યોઽસ્તુ દીપોત્સવઃ ॥૧॥
કેષાઞ્ચિદ્વિષયજ્વરાતુરમહો ચિત્તં પરેષાં વિષા-
વેગોદર્કકુતર્કમૂર્ચ્છિતમથાન્યેષાં કુવૈરાગ્યતઃ ।
લગ્નાલર્કમબોધકૂપપતિતં ચાસ્તે પરેષામપિ,
સ્તોકાનાં તુ વિકારભારરહિતં, તજ્જ્ઞાનસારાશ્રિતમ્ ॥૨॥
જાતોદ્રેકવિવેકતોરણતતૌ ધાવલ્યમાતન્વતિ,
હૃદ્ગેહે સમયોચિતઃ પ્રસરતિ સ્ફીતશ્ચ ગીતધ્વનિઃ ।
પૂર્ણાનન્દઘનસ્ય કિં સહજયા તદ્ભાગ્યભઙ્ગ્યાભવ-
ન્નૈતદ્ગ્રન્થમિષાત્ કરગ્રહમહશ્ચિત્રં ચરિત્રશ્રિયઃ? ॥૩॥
ભાવસ્તોમપવિત્રગોમયરસૈર્લિપ્તૈવ ભૂઃ સર્વતઃ,
સંસિક્તા સમતોદકૈરથ પથિ ન્યસ્તા વિવેકસ્રજઃ ।
અધ્યાત્મામૃતપૂર્ણકામકલશશ્ચક્રેઽત્ર શાસ્ત્રે પુરઃ,
પૂર્ણાનન્દઘને પુરં પ્રવિશતિ સ્વીયં કૃતં મઙ્ગલમ્ ॥૪॥
ગચ્છે શ્રીવિજયાદિદેવસુગુરોઃ સ્વચ્છે ગુણાનાં ગણૈઃ,
પ્રૌઢિં પ્રૌઢિમધામ્નિ જીતવિજયપ્રાજ્ઞાઃ પરામૈયરુઃ ।
તત્સાતીર્થ્યભૃતાં નયાદિવિજયપ્રાજ્ઞોત્તમાનાં શિશોઃ,
શ્રીમન્ન્યાયવિશારદસ્ય કૃતિનામેષા કૃતિઃ પ્રીતયે ॥૫॥

jainuniversity.org
सर्व ज्ञानाय भवतु